# निपातानां द्योतकत्वं वाचकत्वं वा

प्रो. श्रीधर मिश्रः

अस्यां संगोष्ठ्यामहं निपातानां द्योतकत्वं वाचकत्वं वेति विषये स्वकीयान् विचारान् प्रस्तौमि। तत्र सर्वप्रथमं विचार्यते यत् निपातत्वं नाम किम् ? अत्रोच्यते प्रागीश्वरा निपाताः इति। अकीरीश्वरे इत्यतः प्राक् निपाता अधि क्रियन्ते इति तदर्थः। अतः प्रादीनां चा दीनां चोभयेषां निपातत्वं सङ्गच्छते। अव्ययसंज्ञके सूत्रे – ''स्वरादिनिपातमव्ययम्'' इत्यत्र स्वरादीनाम् स्वर्, प्रातर्, सनुतर्, प्रभृतीनाम्, च वा ह प्रभृतीनां निपातानञ्चाव्ययसंज्ञा विधीयते। स्वरादि निपाताद्योः प्रार्थक्ये प्रयोजनं तु ''आद्युदात्ताः निपाताः'' इत्यनेन निपातानां उदात्त्वं तदितरेषां स्वरादीनां तद्भिन्नत्वकल्पनमेव।

अत्र नैयायिकाः प्र परा अप् सम् प्रभृतीनां प्रादीनां द्योतकत्वं, च वा ह प्रभृतीनां चादीनां वाचकत्वं संगिरन्ते। तत्र द्योतकत्वं नाम – स्वसमभिव्याहृतपदनिष्ठशक्त्युद् बोधकत्वं प्रायेण। तेन अनुभवतीत्यादौ 'अनु' इत्येत समभिव्याहृतं समीपोच्चरितं पदं भू प्रभृति तन्निष्ठाया शक्ति अनुभवार्थबोधिका तस्या उद्बोधकत्वं अनाविति लक्षणसमन्वयः। क्वचिच्चक्रिया विशेषाक्षेपकत्वं द्योतकत्वम्। तथाहि विलिखति इत्यत्र विमाय लिखतीत्यर्थावगमर्थान् मानाकि यापेक्षत्वं वावित्यत्र। एवं शक्तिग्राहककोशादिबलार्थबोधजनकत्वांच्चादीनां वाचकत्वं सिद्धयति। साक्षात् प्रत्यक्षतुल्ययोरित्यमरः। किञ्च अन्वयव्यतिरेकाभ्यामपि चादीनां वाचकत्वमङ्गीक्रियेत। तथा हि 'इव' सत्वे सदृशार्थबोधः तदसत्वे तदर्थाप्रवृत्तिः इति नैयायिकाः। तदुक्तम् –

**निपातां वाचकत्वमन्वयव्यतिरेकयोः।**
**युक्तं वा न तु तद्युक्तं परेषां मतमेव नः॥ इति॥**

वैयाकरणास्तु एतन्नसहन्ते। यतो हि येन हेतुना नैयायिकैः प्रादिषु द्योतकत्वं साध्यते तेनैव हेतुना चादिष्वपि द्योतकत्वं सिध्यति। एवमेव येन हेतुनाया दीनां वाचकत्वं साध्यते तेनैव हेतुना प्रादीनामपि वाचकत्वं सिध्यति। प्रादीनां द्योतकत्वं प्रादीनां च वाचकत्वेवेति न नियमः। अपितु उभयोरुभयम्। तदुक्तं वैयाकरणभूषणसारे –

**द्योतकाः प्रादयो येन निपाताश्चादयस्तथा।**
**उपास्येते हरिहरौ लकारो दृश्यते यथा ॥ इति॥**

अत्रेदं विचार्यते। अनुभवतीत्यादौ अनुभवः किम् उपसर्गार्थः विशिष्टस्य अथवा धात्वर्थः। नाद्यः यतोहि अनुभवो यहि उपसर्गार्थः तदा भवते अनुभवार्धात्वर्थफलव्यधिकरणत्वाभावादकर्मकत्वान् 'सुखम्' इत्यत्र कर्मत्वानुपपत्तिः किञ्च उपस्थिते हरिहरौ इत्यत्र कर्मणि लकारो न स्यात्। न विशिष्टार्थः गौरवात्। अतो अन्ततो धात्वर्य एव। तेभ उपसर्गस्य द्योतकत्वे अनुभवार्थकस्य भवतेः सकर्मकत्वे 'सुखम्' इत्यत्र न द्वितीयानुपपत्तिः

उपास्येते हरिहरौ इत्यत्र कर्मणि न लकारानुपपत्तिः। इत्थं यथा प्रादीनां द्योतकत्वं तथा 'चन्द्रमिव पश्यामि' इत्यादौ चन्द्र पदस्य तत्सदृशे लक्षणया चन्द्रस्यसादृश्यविशिष्टे चन्द्रे स्वीकारार्थ इव पदस्य तात्पर्य ग्राहकत्वमात्रात्तस्य द्योतकत्वं सिध्यति। अतः यस्मात् कारणात् प्रादीनां द्योतकत्वं तस्मात् कारणात् चादीनामपि द्योतकत्वं सामान्य तया सिद्धम्। तदुक्तं भूषणसारे -

**तथाऽन्यत्र निपातेऽपि लकारः कर्मवाचकः।**
**विशेषणाद्ययोगोऽपि प्रदिवच्चादिके समः॥ इति॥**

अतएव साक्षात् क्रियते अलङ्क्रियते उरीक्रियते इत्यादावपि धातोः साक्षात्काररुपधात्वर्थ फलव्यधिकरणव्यापार वाचकत्वात् सकर्मकत्वात् कर्मणि लकारः सिद्धः। साक्षात् प्रभृतीनि पदानित्वत्र, तापर्यग्राहकरुपाणि। अतः एषां चादीनां द्योतकत्वमेव सिद्धयति। अतएव अथ शब्दानुशासनम् इत्यत्र 'अथ' शब्द प्रारब्ध क्रिया द्योतको न तु वाचकः निपातत्वादुपसर्गवत् इत्युक्तं कैय्यटेन। निपातत्वं चाखण्डोपाधिरुपं जातिरुपं शब्दस्वरुपं वेति पक्षत्रयेऽपि प्रादिचादि साधारणमेव। यदि उपसर्गाणां चादीनामिव वाचकत्वं स्वीक्रियते तदा 'उपास्यते गुरुः' इत्यादौ आस् धातोः धात्वर्थफलव्यधिकरणव्यापारवाचकत्वाभावात्तस्य कर्मणि न लकारः सिध्येत अतस्तेषु प्रदिषु वाचकत्वं नाङ्गीकर्तुं शक्यते। अपि चादीनामपि वाचकत्वाङ्गीकारे काव्यादौ तेषां नान्वयः। अन्वये च तदुत्तरं विभक्तीनां श्रवणापत्तिः स्यात्।
तदुक्तम् -

**शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिव।**
**इत्यादावन्यो न स्यात् सुपां च श्रवणं ततः॥ इति॥**

उस्रसदृशैः शरैः रसातदृशान् उदीच्यान् उद्धरिष्यन् इत्यर्थः। अत्र 'इव' शब्दस्य सादृश्यद्योतकत्वे प्रकृत्यर्थाभावेन प्रातिपदिकत्वं न करणत्वं च न तृतीयाविभक्त्युत्पत्तिः। उस्रशब्दस्य विशेषणत्वे शरशब्दस्य विशेष्यत्वे चोभयो समानविभक्तिक योरभेदान्वय बोधः। 'इव' शब्दस्य वाचकत्वे तु समानविभक्तकत्वाभावेऽपि अभेदान्वयबोधाय निपातेतरसंकोचस्यावश्यकत्वम् इति गौरवम्। तदुक्तम् -

निपातातिरिक्तसमानाधिकरणप्रातिपदयोरेभेदान्वयव्युत्तिरितिनियमः। तेन स्तोकं पचति मृदु पचति इत्यादौ असमानविभक्तिरयोरपि पदयोरभेदान्वयबोधे न क्षतिः। तदुक्तं वैयाकरणभूषणसारे -

**सदृशः सदृशान्वेति विभागेन कदाचन।**
**निपातेतरसंकोचे प्रमाणं किं विभावय॥ इति॥**

अस्माकं मते निपातानां प्रातिपदिकाभावेन नान्वयः। चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्र्चेत्यत्र निपातशब्दस्य नाम्नः पार्थक्येनोपदिष्टत्वात्। अस्माकं मते उपसर्गनिपातयोःरुभयोरपि द्योतकत्वस्वीकारे न हानिः। तदुक्तम् आकृत्याधिकरणे-

**चतुर्विधे पदे चात्र द्विविधस्यार्थनिर्णयः।**
**क्रियते संशयोत्पत्तेर्नोपसर्गनिपातयोः॥**
**तयोरर्थाभिधाने हि व्यापारो नैव विद्यते।**
**तदर्थद्योतकौ तौ तु वाचकः स विचार्यते॥ इति॥**

अनेन सिध्यति यदर्थसंशये सति नामाख्यातयोरेव अर्थकथनव्यापार ऋषिभिः कृतो नोपसर्गनिपातयोः। यतोहि सामान्यरुपेण उपसर्गनिपातौ द्योतकावेव। अनयोर्वाचकत्वे विशेषरूपेण विचारः कर्त्तव्यः। इदानीं चतुर्विधानां पदजातानां विषये विचार्यताम्। प्रातिशाख्येऽपि नामाख्यातमुपसर्गो निपातः, चत्वार्याहुः पदजातानि शब्दाः। तत्र –

**तन्नाम येनाभिदधाति सत्वं, तदाख्यातं येनभावं सधातुः।**
**उपसर्गा विंशतिरर्थवाचकाः सहेतराभ्यामितरे निपाताः॥**
**क्रियावाचकमाख्यातमुपसर्गो विशेषकृत्।**
**सत्वाभिधायकं नाम निपाताः पादपूरणाः॥ इति॥**

इत्थं च वैयाकरणानुसारम् उभयत्राप्युभयम्। निपातानामपि द्योकतत्वं सिध्यति। उपसर्गाणां द्योतकत्वं तु सर्वेषां मतेन्।

*आचार्यः व्याकरणविभागः*
*राष्ट्रीय संस्कृत संस्थानम्*
*जयपुर परिसरः*